# शुद्धिकौमुदी

## पाठः १८ - २३.०९.२०१७

## क्रियापदानि

© All the content in these slides is the intellectual property of Vyoma Linguistic Labs Foundation.
Replication/reuse in any form without express written permission from the organisation is prohibited.

# क्रियापदानि

- आपृच्छनसमारम्भः

  'आप्रच्छनम्'……

- अलभिष्यत

  'अलप्स्यत'……..

# क्रियापदानि

- एतां गोष्ठीम् अध्यक्षवर्यः स्वीकरोति ।

  'गोष्ठीं निर्वहति'...............

- सः प्रथमं स्थानं प्राप्तुं बहुधा प्रयतितवान् ।

  'प्रयत्तवान्'............


vyoma ॥ वाचं धेनुमुपासीत ॥ Saṃskṛtam · Value Education · Technology

# क्रियापदानि

- पृष्ठतः स्थितः बालकः अग्रे स्थितं नोदितवान् ।

  'नुन्नवान्'............

- सः जलेन सस्यानि सिञ्चितवान् ।

  'सिक्तवान्'............

# क्रियापदानि

- कृषिकः कूपं खनितवान् ।

  'खातवान्'...........

- बालकः रज्जुम् आकर्षितवान् ।

  'आकृष्टवान्'...........


vyoma ॥ वाचं धेनुमुपासीत ॥
Saṃskṛtam · Value Education · Technology

# क्रियापदानि

- सर्पः मूषकं गिलितवान् ।

    'गीर्णवान्'...........

- जनाः शर्मवर्यं नायकत्वेन चयितवन्तः ।

    'चितवन्तः'.................

# क्रियापदानि

- मध्यरात्रे सः जागृतः जातः ।

  ’जागरितः’...............

- अयि सुहृदः, उत्तिष्ठत, जाग्रत, कार्याय गच्छत ।

  ’जागृत’............


vyoma ॥ वाचं धेनुमुपासीत ॥ Saṃskṛtam · Value Education · Technology

# क्रियापदानि

- सः अपक्तं शाकम् एव खादति ।

  'अपक्वम्'............

- स्पर्धायाम् अहं (प्रतिस्पर्धिनं) जितः ।

  'जितवान्'..........

# क्रियापदानि

- सः मित्रगृहे द्वित्राणि दिनानि उषितुम् इष्टवान् ।

  'वस्तुम्'.............

- शर्मवर्यः उपन्यस्तुं नगरान्तरं गतवान् ।

  'उपन्यसितुम्'..........


vyoma ॥ वाचं धेनुमुपासीत ॥ Saṃskṛtam · Value Education · Technology

# क्रियापदानि

- शैत्यकाले अपि तर्तुं मम इच्छा भवति एव ।

  'तरितुम्/तरीतुम्'...........

- दुष्टः शुनकः स्वामिना बद्धव्यः ।

  'बन्धव्यः'.................


vyoma ॥ वाचं धेनुमुपासीत ॥ Saṃskṛtam · Value Education · Technology

# क्रियापदानि

- कार्यक्रमार्थं के आह्वयितव्याः इति चिन्तनीयम् ।

  'आह्वातव्याः'..................

- 'भगवतः नाम सहस्रवारं जप्तव्यम्' इति गुरुः उक्तवान् ।

  'जपितव्यम्'...............

# क्रियापदानि

- एवं त्वया न इच्छितव्यम् आसीत् ।

  'एष्टव्यम्'.................

- भिक्षुकाय वस्त्रं ददन् धनिकः सन्तुष्टः ।

  'ददत्'...................


vyoma ॥ वाचं धेनुमुपासीत ॥ Saṃskṛtam · Value Education · Technology

# क्रियापदानि

- बालिका कार्यं कुर्वन्ती सम्भाषणं करोति ।

  ’कुर्वंती’.....................

- कार्यं क्रियमाणः सः वेतनं लभते ।

  ’कुर्वन्/कुर्वाणः’............


vyoma ॥ वाचं धेनुमुपासीत ॥ Saṃskṛtam · Value Education · Technology

# क्रियापदानि

- ’उष्यमाणं गृहम्’, ’गम्यमानः मार्गः’

  ’यत्र उष्यते तत् गृहम्’, ’येन गम्यते सः मार्गः’

| अशुद्धम् | शुद्धम् |
|---|---|
| क्रीयमाणः आपणः | यत्र वस्तूनि क्रीयन्ते, सः आपणः |
| शय्यमानः प्रकोष्ठः | यत्र शय्यते सः प्रकोष्ठः |
| गम्यमानं लोकयानम् | येन जनाः गच्छन्ति तत् लोकयानम् |
| सुप्यमाना शय्या | यत्र सुप्यते सा शय्या |
| लिख्यमानं कादगम् | यत्र लिख्यते तत् कागदम् |
| उपविश्यमानः आसन्दः | यस्मिन् उपविश्यते सः आसन्दः |
| स्नायमाना नदी | यत्र स्नायते सा नदी |

# क्रियापदानि

- सः ग्रन्थं पठितः ।

’पठितवान्’.........

’तेन ग्रन्थः पठितः’................

’पुष्पेण विकसितम्’...........

’उत्थितः /उत्थितवान् सः’..................

# क्रियापदानि

- अरण्ये व्याघ्राः हरिणान् निश्शङ्कं निहन्ति ।

  'निघ्नन्ति'...........

- इदानीं किं करणीयम् इति योचयन् आसीत् गणेशः ।

  'आलोचयन्', 'आलोचमानः', 'चिन्तयन्'.............

# क्रियापदानि

- भवन्तः पुनः अपि मम् गृहम् आगमिष्यन्तु ।

  ’आगच्छन्तु’..........

- परश्वः प्रातः एव अहम् आगच्छामि ।

  ’परश्वः आगमिष्यामि’...............

# क्रियापदानि

- यदि भवान् वदति स्म, अहं करोमि स्म ।

  ’यदि भवान् अवदिष्यत्/वदेत् तर्हि अहम् अकरिष्यम्/कुर्याम्’

- व्याघ्रं दृष्ट्वा सः कम्पितुम् आरब्धवान् ।

  ’कम्पितः जातः’............

  ’व्याघ्रं दृष्टवति तस्मिन् कम्पनम् उत्पन्नम्’...........

# क्रियापदानि

- सः किमपि वक्तुं प्रस्थितः ।

  ’वक्तुम् उद्युक्तः’............

- रामः रावणम् असंहरत् ।

  ’समहरत्’..........

# क्रियापदानि

- एवम् उक्त्वा देवः अन्तर्धानः जातः ।

  'अन्तर्हितः जातः', 'अन्तर्धानं गतः' .......

- सः राजनीतिक्षेत्रे पदं निधत्तवान् ।

  'निहितवान्'.........

# क्रियापदानि

- सचिवः योजनां क्रियान्वेतुं प्रयत्नं कृतवान् ।

  'क्रियान्वितां कर्तुम्', 'व्यवहारपथम् आनेतुम्'............

- रामः राक्षससंहाराय ब्रह्मास्त्रं त्यक्तवान् ।

  '...........ब्रह्मास्त्रं प्रयुक्तवान्'.........


vyoma ॥ वाचं धेनुमुपासीत ॥
Saṃskṛtam · Value Education · Technology

# क्रियापदानि

- सः गोष्ठ्यां स्वस्य प्रबन्धं मण्डितवान् ।

  ’उपस्थापितवान्’..........

- भवता एतद्विषये चिन्ता विहितव्या नास्ति ।

  ’विधातव्या’............


vyoma ॥ वाचं धेनुमुपासीत ॥ Saṃskṛtam · Value Education · Technology

# क्रियापदानि

- बालकः दशवादने निद्रितवान् ।

  ’निद्राणवान्’...........

- अद्यत्वे अध्यापकाः परीक्षायाम् उत्तराणि लेखापयन्ति ।

  ’लेखयन्ति’....


vyoma ॥ वाचं धेनुमुपासीत ॥ Saṃskṛtam · Value Education · Technology

QUESTIONS/DOUBTS?

Email us @

sanskritfromhome@vyomalabs.in

For downloading course-materials, login @
www.sanskritfromhome.in

Subscribe to our youtube channel @
vyoma-samskrta-pathasala

Buy our Samskrita-learning products @
www.digitalsanskritguru.com

Support our cause for Samskrita-Samskriti @
www.vyomalabs.in

© All the content in this presentation is the intellectual property of Vyoma Linguistic Labs Foundation.
All materials shared in our website are purely for the purpose of personal study.
Replication/reuse in any form without written permission from the organisation is prohibited.